Roll No. ....................................
Signature of Invigilator ………………………

**Paper Code**
**BD-203**

# पतंजलिविश्वविद्यालयः

# University of Patanjali

**Examination May – 2018**

**B. A. Philosophy (Semester: Second)**

**संस्कृत**

**संस्कृत–साहित्य–2**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

---

**निर्देशः** अस्य प्रश्नपत्रस्य सप्तत्यङ्काः निर्धारिताः सन्ति। इदं प्रश्नपत्रम् 'क' 'ख' 'ग' इत्याख्येषु त्रिषु खण्डेषु विभक्तं वर्तते। प्रत्येकखण्डे प्रदत्तानां विस्तृतनिर्देशाणामनुसारेणैव प्रश्नाः समाधेयाः।

## खण्डः क
## (दीर्घोत्तरीयप्रश्नाः)

**निर्देशः 'क'** खण्डे पञ्चदीर्घोत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चदशाङ्काः निर्धारिताः वर्तन्ते। एतत्पञ्चप्रश्नेषु त्रयः प्रश्नाः एव समाधेयाः। **(3×15=45)**

1. बुद्धचरितान्तर्गतपञ्चमसर्गस्य सारांश लिखत।
2. बुद्धचरितदिशा छन्दकविसर्जनं वर्णयत।
3. बुद्धचरितमहाकाव्यस्य भाषासौष्ठवं वर्णयत।
4. तपोवनप्रवेशवर्णनं यथाग्रन्थं वर्णयत।
5. बुद्धचरितान्तर्गतस्य अष्टमसर्गस्य कथासारो लेख्यः।

## खण्डः ख
## (लघूत्तरीयप्रश्नाः)

**निर्देशः 'ख'** खण्डे षड्लघूत्तरीयप्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय पञ्चाङ्काः निर्धारिताः विद्यन्ते। एतेषु केवलं चत्वारः एव प्रश्नाः समाधेयाः। **(4×5=20)**

1. अव्ययीभावसमासं सूत्रोदाहरणपूर्वकं स्पष्टयत।
2. 'हरि–गुरुशब्दयोः' रूपाणि लिखत।
3. 'संस्कृतभाषा' इति विषयमादाय पञ्चदश संस्कृतवाक्यानि लिखत।
4. "अथ मन्त्रिसुतैः क्षमैः कदाचित् सखिभिश्चित्रकथैः कृतानुयात्रः।
   वनभूमिदिदृक्षया शमेप्सुर्नरदेवानुमतो बहिः प्रतस्थे।।"
   इति पद्य सप्रसङ्ग व्याख्येयम्।
5. पठ्–गम्–भू–बुधधातूनां विधिलिङ्लकारे रूपाणि लिखत।
6. "हयश्च सौजा विचचार कन्थकस्तताम भावेन बभूव निर्मदः। अलङ्कृतश्चापि तथैव भूषणैरभूद्गतश्रीरिव तेन वर्जितः।।"
   इति पद्यस्य विभक्तिवचननिर्देशपूर्वकं सप्रसङ्ग व्याख्या कार्या।

## खण्डः ग
## (अतिलघूत्तरीयाः प्रश्नाः)

**निर्देशः 'ग'** खण्डे दशातिलघूत्तरीयाः प्रश्नाः प्रदत्ताः सन्ति। प्रत्येकप्रश्नाय अर्द्धाङ्कः निर्धारितः वर्तते। अस्मिन् खण्डे प्रदत्तानां सर्वेषां प्रश्नानाम् उत्तरणमनिवार्यमस्ति । **(10×0.5=05)**

1. इयाय भर्तुर्विरहं विचिन्तयंस्तमेव पन्थानमहोभिः ..............................?

(अ) पञ्चभिः (ब) सप्तभिः
(स) अष्टभिः (द) नवभिः

2. बुद्धचरितस्य प्रणेता ?

(अ) बुद्धः (ब) अश्वघोषः
(स) श्रीहर्षः (द) मङ्खकः

3. शुद्धं वाक्यम् अस्ति ....................

(अ) सः ग्रन्थं पठ्यते (ब) तेन ग्रन्थं पठ्येते
(स) तेन ग्रन्थः पठ्यते (द) तेन् ग्रन्थं पठयते

4. बुद्धचरित पञ्चमसर्गस्य नाम अस्ति ..............

(अ) अभिनिष्क्रमणः (ब) तपोवनगमनम्
(स) छन्दकविसर्जनम् (द) कामनिन्दा

5. भार्गवस्य आश्रमपदं ददर्श ......................................

(अ) नृणां वरः (ब) शुकः
(स) वाजिः (द) वृहस्पतिः

6. राजपुरुषः इत्यत्र समासः अस्ति .........................

(अ) अव्ययीभावः (ब) केवलसमासः
(स) बहुब्रीहिः (द) षष्ठीतत्पुरुषः

7. 'प्रार्थना होनी चाहिये' इत्यस्य अनुवादः अस्ति ..................

(अ) प्रार्थना भवितव्या (ब) प्रार्थना भवनीया
(स) प्रार्थनया भवितव्यः (द) प्रार्थनया भवितव्यम्

8. कुलार्थं धार्यते ......................................................................

(अ) पिता (ब) पुत्रः
(स) गुरुः (द) शिष्यः

9. जन्ममृत्युभीतः .................................. प्रब्रजितोऽस्मि मोक्षहेतोः।

(अ) वीरः (ब) श्रमणः
(स) कृपणः (द) कृषकः

10. औपश्लेषिक-आधारस्य उदाहरणम् अस्ति ....................................

(अ) कटे आस्ते (ब) मोक्षे इच्छा
(स) सर्वस्मिन्नात्मा (द) अधीती व्याकरणे

---------------x---------------